# श्री चण्डी कवचम् ( पुरुष हेतु)

श्री चण्डीकवचस्य, ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । चामुण्डा देवता । अङ्गन्यासोक्तमातरो बीजम् । दिग्बन्ध देवतास्तत्त्वम् । श्री जगदम्बा प्रीत्यर्थे मम सपरिवारस्य रक्षणार्थे च पाठे विनियोगः ॥

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ।

महाबले महोत्साहे महाभयविनाशिनि ॥ १६॥

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ।

प्राच्यां रक्षतु माम् ऐन्द्री आग्नेय्याम् अग्निदेवता ॥ १७॥

दक्षिणेऽवतु वाराही नैऋत्यां खड्गधारिणी ।

प्रतीच्यां वारुणी रक्षेत् वायव्यां मृगवाहिनी ॥ १८॥

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ।

ऊर्ध्वं ब्रह्माणि मे रक्षेत् अधस्ताद् वैष्णवी तथा ॥ १९॥

एवं दश दिशो रक्षेत् चामुण्डा शववाहना ।

जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥ २०॥

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।

शिखाम् उद्योतिनी रक्षेत् उमा मूर्ध्नि व्यवस्थिता ॥ २१॥

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।

त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥ २२॥

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।

कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी ॥ २३॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।

अधरे चामृतकला जिह्वायां च सरस्वती ॥ २४॥

स्वामी रूपेश्वरानंद आश्रम

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।

घण्टिकां चित्रघण्टा च महामाया च तालुके ॥ २५॥

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला ।

ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ २६॥

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ।

स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥ २७॥

हस्तयोर्दण्डिनी रक्षेत् अम्बिका चाङ्गुलीषु च ।

नखान् शूलेश्वरी रक्षेत् कुक्षौ रक्षेत्कुलेश्वरी ॥ २८॥

स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी ।

हृदये ललिता देवी उदरे शूलधारिणी ॥ २९॥

नाभौ च कामिनी रक्षेत् गुह्यं गुह्येश्वरी तथा ।

पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥ ३०॥

कट्यां भगवती रक्षेत् जानुनी विन्ध्यवासिनी ।

जङ्घे महाबला रक्षेत् सर्वकामप्रदायिनी ॥ ३१॥

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ।

पादाङ्गुलीषु श्री रक्षेत् पादाधस्तलवासिनी ॥ ३२॥

नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।

रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥ ३३॥

रक्तमज्जावसामांसान् अस्थिमेदांसि पार्वती ।

अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ ३४॥

पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।

ज्वालामुखी नखज्वाला अभेद्या सर्वसन्धिषु ॥ ३५॥

स्वामी रूपेश्वरानंद आश्रम

रजं ब्रह्माणि मे रक्षेत् छायां छत्रेश्वरी तथा ।

अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥ ३६॥

प्राणापानौ तथा व्यानमुदानं च समानकम् ।

वज्रहस्ता च मे रक्षेत् प्राणं कल्याणशोभना ॥ ३७॥

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।

सत्त्वं रजस्तमश्चैव रक्षेन् नारायणी सदा ॥ ३८॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।

यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥ ३९॥

गोत्रमिन्द्राणि मे रक्षेत् पशून्मे रक्ष चण्डिके ।

पुत्रान् रक्षेन्महालक्ष्मी भार्यां रक्षतु भैरवी ॥ ४०॥

पन्थानं सुपथा रक्षेत् मार्गं क्षेमकरी तथा ।

राजद्वारे महालक्ष्मी विजया सर्वतः स्थिता ॥ ४१॥

रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु ।

तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ ४२॥

स्वामी रुपेश्वरानंद आश्रम

अधिक जानकारी के लिए SWAMI RUPESHWARANAND YouTube चैनल देखें!

देवी चंडी कवच सिद्धि एवं प्रयोग विधि?
https://youtu.be/Snso55wjs2I?si=qHvrAbjjHxy7Tlgf

*"This PDF is the revised work of swamirupeshwaranand.in and is protected under copyright. Do not reproduce without written permission.*

*संशोधित द्वारा, स्वामी रुपेश्वरानंद आश्रम, बलुआ घाट, चंदौली, वाराणसी, उत्तर प्रदेश*

*संपर्क/ WhatsApp/ कॉल: +91 – 76072333230*

*Mail Id : swamirupeshwar@gmail.com*

*वेबसाइट : https://www.swamirupeshwaranand.in*